नर्मदाष्टकं

{॥ नर्मदाष्टकं ॥}

सबिन्दुसिन्धुसुस्खलत्तरङ्गभङ्गरञ्जितं

द्विषत्सु पापजातजातकादिवारिसंयुतम् ।

कृतान्तदूतकालभूतभीतिहारिवर्मदे

त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ १॥

त्वदम्बुलीनदीनमीनदिव्यसम्प्रदायकं

कलौ मलौघभारहारिसर्वतीर्थनायकम् ।

सुमच्छकच्छनक्रचक्रवाकचक्रशर्मदे

त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ २॥

महागभीरनीरपूरपापधूतभूतलं

ध्वनत्समस्तपातकारिदारितापदाचलम् ।

जगल्लये महाभये मृकण्डुसूनुहर्म्यदे

त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ ३ ॥

गतं तदैव मे भयं त्वदम्बु वीक्षितं यदा

मृकण्डुसूनुशौनकासुरारिसेवितं सदा ।

पुनर्भवाब्धिजन्मजं भवाब्धिदुःखवर्मदे

त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ ४॥

अलक्ष्यलक्षकिन्नरामरासुरादिपूजितं

सुलक्षनीरतीरधीरपक्षिलक्षकूजितम् ।

वसिष्ठशिष्टपिप्पलादिकर्दमादिशर्मदे

त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ ५॥

सनत्कुमारनाचिकेतकश्यपात्रिषत्पदैः

धृतं स्वकीयमानसेषु नारदादिषतपदैः ।

रवीन्दुरन्तिदेवदेवराजकर्मशर्मदे

त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ ६॥

अलक्षलक्षलक्षपापलक्षसारसायुधं

ततस्तु जीवजन्तुतन्तुभुक्तिमुक्तिदायकम् ।

विरिञ्चिविष्णुशंकरस्वकीयधामवर्मदे

त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ ७॥

अहो धृतं स्वनं श्रुतं महेशिकेशजातटे

किरातसूतबाडबेषु पण्डिते शठे नटे ।

दुरन्तपापतापहारि सर्वजन्तुशर्मदे

त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥ ८॥

इदं तु नर्मदाष्टकं त्रिकालमेव ये सदा

पठन्ति ते निरन्तरं न यन्ति दुर्गतिं कदा ।

सुलभ्यदेहदुर्लभं महेशधामगौरवं

पुनर्भवा नरा न वै विलोकयन्ति रौरवम् ॥ ९॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य

श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य

श्रीमच्छंकरभगवतः कृतौ

नर्मदाष्टकं सम्पूर्णम् ॥

% Encoded by "Savithri D"

% Date: Fri, 09 Jun 2000

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Narmada Ashtakam Lyrics in Devanagari PDF
% File name : narmadaa8.itx
% Category : aShTaka
% Location : doc_devii
% Author : Popular stotra
% Language : Sanskrit
% Subject : philosophy/hinduism
% Transliterated by : Savithri D. savdev at hotmail.com
% Proofread by : Savithri D. savdev at hotmail.com
% Latest update : June 14, 2000
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%

% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website